# अथ रामगीत्यष्टकम्

१) नाकिनायकयाचनाञ्चनमाचरन् किल केवलम्
भास्करान्वयभास्करो भगवानभूः शुभसम्पदे ।
यज्ञपूरुष यज्ञपालक यज्ञसंज्ञ नमोस्तुते
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

२) जानकीं जननीं जनस्य पुरेन्दिरामतिसुन्दरीं
रञ्जयन् भुवनं जयन् स्वगुणैर्नयैर्विनयैरपि ।
राजराजरमां त्यजन् तृणवद् वनेऽरमयो मुनीन्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

३) नाथ मोहयता खलानखिलांस्त्वया खलु मैतिली
नैव नैव वियोगिनी गुरुयोगिनी स्थिरयोगिनी ।
उज्जगाविदमब्ज्भूः शपथेन ते कथयन् कथाः
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

४) वीरमारुतविक्रमार्चित भानुनन्दननन्दन
भ्रूविलासविशेषभीषितवारिधे गुणवारिधे ।
विश्वभूषण शत्रुभीषण हे विभीषणसख्यवन्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

५) रावणं जनरावणं सुरवारणप्रतिवारणे
सिंहमुग्रबलं शरैर्नन्नु लीलया निगृहीतवान् ।
सज्जनान् करुणाकरानुगृहीतवान् भगवान् भवान्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

६) श्यामले शबळे महामणिहेमभूषणभानुभिः
कोमलेऽशनिसन्निभैरकृतव्रणे रिपुसायकैः ।
नाथ नूतनयौवनेऽपि पुराणपूरुषविग्रहे
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

७) उल्लसत्तिलके जगत्तिलके सरोजविलोचने
पूर्णचन्द्रनिभानने मितभाषणे स्मितशोभने ।
दीर्घदोक्षि विशालवक्षसि कुन्जरेन्द्रगते गतौ
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

८) लक्ष्मणाग्रज लक्षयेन्मम वीक्षणं तव वल्लभं
कोसलेन्द्र कथामलं कथयीत ते मम भारती ।
राघव श्रवणं शृणोतु पराक्रमांस्तव विक्रमान्
राम राम रमापते रमतां मनस्त्वयि मे सदा ॥

९) रामगीतिमिमां शुभां पठते जनाय महादरात्
रामसद्गुणरत्नराजसुराजिराजितमालिकाम् ।
राम एव रमापती रतिमात्मनः पदपद्मयोः
राति राति परां गतिं करुणामृताम्बुधिरीशिता ॥

--**--**--